श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिंशः सर्गः ॥

## श्रीरामेण परुषमुक्तस्य खरस्य तं प्रति परुषोक्तिस्तदुपरि खरेण शालेन प्रहारश्च तं शालं छित्त्वा श्रीरामेण खरस्य वधो देवैर्मुनिभिश्च श्रीरामस्य स्तवनम्

भित्त्वा तु तां गदां बाणै राघवो धर्मवत्सलः।
स्मयमान इदं वाक्यं संरब्धमिदमब्रवीत्॥ **3.30.1** ॥

एतत् ते बलसर्वस्वं दर्शितं राक्षसाधम।
शक्तिहीनतरो मत्तो वृथा त्वमुपगर्जसि॥ **3.30.2** ॥

एषा बाणविनिर्भिन्ना गदा भूमितलं गता।
अभिधानप्रगल्भस्य तव प्रत्ययघातिनी॥ **3.30.3** ॥

यत् त्वयोक्तं विनष्टानामिदमश्रुप्रमार्जनम्।
राक्षसानां करोमीति मिथ्या तदपि ते वचः॥ **3.30.4** ॥

नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः।
प्राणानपहरिष्यामि गरुत्मानमृतं यथा॥ **3.30.5** ॥

अद्य ते भिन्नकण्ठस्य फेनबुद्बुदभूषितम्।
विदारितस्य मद्बाणैर्मही पास्यति शोणितम्॥ **3.30.6** ॥

पांसुरूषितसर्वाङ्गः स्रस्तन्यस्तभुजद्वयः।
स्वप्स्यसे गां समाश्लिष्य दुर्लभां प्रमदामिव॥ **3.30.7** ॥

प्रवृद्धनिद्रे शयिते त्वयि राक्षसपांसने।
भविष्यन्ति शरण्यानां शरण्या दण्डका इमे॥ **3.30.8** ॥

जनस्थाने हतस्थाने तव राक्षस मच्छरैः।
निर्भया विचरिष्यन्ति सर्वतो मुनयो वने॥ **3.30.9** ॥

अद्य विप्रसरिष्यन्ति राक्षस्यो हतबान्धवाः।
बाष्पार्द्रवदना दीना भयादन्यभयावहाः॥ **3.30.10** ॥

अद्य शोकरसज्ञास्ता भविष्यन्ति निरर्थिकाः।
अनुरूपकुलाः पत्न्यो यासां त्वं पतिरीदृशः॥ **3.30.11** ॥

नृशंसशील क्षुद्रात्मन् नित्यं ब्राह्मणकण्टक।
त्वत्कृते शङ्कितैरग्नौ मुनिभिः पात्यते हविः॥ **3.30.12** ॥

तमेवमभिसंरब्धं ब्रुवाणं राघवं वने।
खरो निर्भर्त्सयामास रोषात् खरतरस्वरः॥ **3.30.13** ॥

दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः।
वाच्यावाच्यं ततो हि त्वं मृत्योर्वश्यो न बुध्यसे॥ **3.30.14** ॥

कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये।
कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः॥ **3.30.15** ॥

एवमुक्त्वा ततो रामं संरुध्य भृकुटिं ततः।
स ददर्श महासालमविदूरे निशाचरः॥ **3.30.16** ॥

रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन्।
स तमुत्पाटयामास सन्दष्टदशनच्छदम्॥ **3.30.17** ॥

तं समुत्क्षिप्य बाहुभ्यां विनर्दित्वा महाबलः।
राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत्॥ **3.30.18** ॥

तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान्।
रोषमाहारयत् तीव्रं निहन्तुं समरे खरम्॥ **3.30.19**॥

जातस्वेदस्ततो रामो रोषरक्तान्तलोचनः।
निर्बिभेद सहस्रेण बाणानां समरे खरम्॥ **3.30.20**॥

तस्य बाणान्तराद् रक्तं बहु सुस्राव फेनिलम्।
गिरेः प्रस्रवणस्येव धाराणां च परिस्रवः॥ **3.30.21**॥

विकलः स कृतो बाणैः खरो रामेण संयुगे।
मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद् द्रुतम्॥ **3.30.22**॥

तमापतन्तं सङ्क्रुद्धं कृतास्त्रो रुधिराप्लुतम्।
अपासर्पद् द्वित्रिपदं किञ्चित्त्वरितविक्रमः॥ **3.30.23**॥

ततः पावकसङ्काशं वधाय समरे शरम्।
खरस्य रामो जग्राह ब्रह्मदण्डमिवापरम्॥ **3.30.24**॥

स तद् दत्तं मघवता सुरराजेन धीमता।
सन्दधे च स धर्मात्मा मुमोच च खरं प्रति॥ **3.30.25**॥

स विमुक्तो महाबाणो निर्घातसमनिःस्वनः।
रामेण धनुरायम्य खरस्योरसि चापतत्॥ **3.30.26**॥

स पपात खरो भूमौ दह्यमानः शराग्निना।
रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथान्धकः॥ **3.30.27**॥

स वृत्र इव वज्रेण फेनेन नमुचिर्यथा।
बलो वेन्द्राशनिहतो निपपात हतः खरः॥ **3.30.28**॥

एतस्मिन्नन्तरे देवाश्चारणैः सह सङ्गताः।
दुन्दुभीश्चाभिनिघ्नन्तः पुष्पवर्षं समन्ततः॥ **3.30.29**॥

रामस्योपरि संहृष्टा ववर्षुर्विस्मितास्तदा।
अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥ **3.30.30** ॥

चतुर्दश सहस्राणि रक्षसां कामरूपिणाम्।
खरदूषणमुख्यानां निहतानि महामृधे ॥ **3.30.31** ॥

अहो बत महत्कर्म रामस्य विदितात्मनः।
अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते ॥ **3.30.32** ॥

इत्येवमुक्त्वा ते सर्वे ययुर्देवा यथागतम्।
ततो राजर्षयः सर्वे सङ्गताः परमर्षयः ॥ **3.30.33** ॥

सभाज्य मुदिता रामं सागस्त्या इदमब्रुवन्।
एतदर्थं महातेजा महेन्द्रः पाकशासनः ॥ **3.30.34** ॥

शरभङ्गाश्रमं पुण्यमाजगाम पुरन्दरः।
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥ **3.30.35** ॥

एषां वधार्थं शत्रूणां रक्षसां पापकर्मणाम्।
तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥ **3.30.36** ॥

स्वधर्मं प्रचरिष्यन्ति दण्डकेषु महर्षयः।
एतस्मिन्नन्तरे वीरो लक्ष्मणः सह सीतया ॥ **3.30.37** ॥

गिरिदुर्गाद् विनिष्क्रम्य संविवेशाश्रमे सुखी।
ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ॥ **3.30.38** ॥

प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिपूजितः।
तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ॥ **3.30.39** ॥

**बभूव हृष्टा वैदेही भर्तारं परिषस्वजे।**
**मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान्।**
**रामं चैवाव्ययं दृष्ट्वा तुतोष जनकात्मजा ॥ 3.30.40 ॥**

**ततस्तु तं राक्षससङ्घमर्दनं**
**सम्पूज्यमानं मुदितैर्महात्मभिः।**
**पुनः परिष्वज्य मुदान्वितानना**
**बभूव हृष्टा जनकात्मजा तदा ॥ 3.30.41 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे त्रिंशः सर्गः ॥